कक्षा नवमी

प्रेषणात्मकं संस्कृतम्

**पूर्णांकाः ९०**

**निर्देशाः**

1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति -

| | | |
|---|---|---|
| खण्ड क | अपठित–अवबोधनम्) | १० अंकाः |
| खण्ड ख | रचनात्मक कार्यम्) | १५ अंकाः |
| खण्ड ग | (अनुप्रयुक्त-व्याकरणम्) | ३० अंकाः |
| खण्ड घ | (पठित-अवबोधनम्) | ३५ अंकाः |

2. सर्वे प्रश्नाः अनिवार्याः ।
3. प्रश्नानामुत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।
4. प्रश्नसंख्या अवश्यमेव लेखनीया ।
5. उत्तराणि संस्कृतेनैव लेखनीयानि ।

**खण्ड क (अपठित अवबोधनम्) १० अंकाः**

**1. अधोलिखितमनुच्छेदं पठित्वा प्रश्नानामुत्तराणि संस्कृतेन लिखत -**

वर्तमानयुगं विज्ञानमयम् । अस्माकं सर्वासु क्रियासु विज्ञानतत्वानि एवं विराजन्ते । पठनक्रियाम् एव पश्यन्तु । पठने अपि विज्ञानस्य सिद्धान्ताः अनुकरणीयाः । यदि न करिष्यामः तर्हि नेत्रयोः विकारः भवितुं शक्नोति । पुस्तकं यदि नेत्रयोः अतिसमीपं भवति तर्हि पठितुं न शक्यते । यदा पुस्तकं अति दूरं भवति तदा अपि पठनं अति दुष्करं भवति। नेत्रविशेषज्ञाः कथयन्ति यत् प्रायः पंचविंशतिसेण्टिमीटरमितं (२५ सेमी) दूरम् अन्तरं समीचीनं भवति । तावद् दूरं पुस्तकं गृहीत्वा पठने यदि बाधा नास्ति तदा शोभनं परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपे गत्वा नेत्रपरीक्षणं कारयेत् अन्यथा नेत्रदृष्टिः दुर्बला भवेत् । अपि च शयानः अपि न पठेत् । प्रतिदिनं च सूर्योदये नेत्रव्यायामः करणीयः येन वृद्धावस्थायामपि उपनेत्रस्य आवश्यकता न भवेत् ।

**क. एकपदेन उत्तरत -** 1/2½ × 4 = 2

i) वर्तमानयुगम् कीदृशमस्ति ?

ii) नेत्रव्यायामः प्रतिदिनं कदा करणीयः ?

iii) पठने पुस्तकं नेत्राभ्याम् (२५ सेमी) दूरं भवेत् इति के कथयन्ति?



https://www.evidyarthi.in/

¡v)) पठने कस्य सिद्धान्ताः अनुकरणीयाः ?

**ख. पूर्णवाक्येन उत्तरत -** 2 × 2 = 4

¡) यदा पुस्तकं अतिदूरं भवति तदा किम् भवति ?

¡¡) कियतः दूरात् पुस्तकं पठनीयम्?

**ग. दत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत -** ½ × 4 =2

¡) 'अतिदूरम्' शब्दस्य विलोमपदं लिखत ।

क) अतिशोभनम् ख) अतिसमीपं

ग) अतिसरलम् घ) अतिदुष्करम्

¡¡) 'कठिनम्' इत्यर्थे कः शब्दः प्रयुक्तः?

क) सरलम् ख) समीपं

ग) शोभनम् घ) दुष्करम्

¡¡¡) अस्माकं सर्वासु क्रियासु ------------------विराजन्ते।अत्र विशेषणपदं किमस्ति **?**

क) अस्माकं ख) सर्वासु

ग) क्रियासु घ) विराजन्ते ।

¡v) यदा पुस्तकं अतिदूरं भवति इतिपदस्य क्रियाविशेषणपदं किम् अस्ति ?

क) यदा ख) पुस्तकं

ग) अतिदूरं घ) भवति

**घ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत** । 2

**खण्ड ख (रचनात्मक कार्यम्) १५ अंकाः**

**2.भवान् माधवः। भवान् दिल्लीनगरम् आगतः स्वविद्यालयस्य वर्णनं मुम्बईनगरे स्थितं मित्रराघवं प्रति लिखिते पत्रे मंजूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत ।** ½×10=5

**मंजूषा -**

| |
|---|
| एकस्मिन्, क्रीडाक्षेत्रम्, विद्यालयस्य, शिक्षायाः, कार्यशालाः, माधवः, सन्ति, आगच्छ, प्राप्य, संस्कृतपाठनस्य । |



https://www.evidyarthi.in/

प्रिय मित्र राघव!

नमस्ते।

वयं सकुशलं दिल्लीनगरं प्राप्ताः । अत्र मया गृहस्य समीपे एव (1) ............. विद्यालये प्रवेशः लब्धः। अस्मिन् विद्यालये (2) ............. माध्यमं तु आंग्लभाषा अस्ति तथापि (3) ................. सुव्यवस्था अस्ति । अतिविशालः अयं विद्यालयः । अस्य (4) .......... त्रयः विभागाः - प्राथमिकः, माध्यमिकः वरिष्ठमाध्यमिकः च ।

अस्मिन् विद्यालये विशालं (5) ............... एकं तरणतालं तथा च पाठ्येतरक्रियाणां प्रशिक्षणार्थं (6) .............. सन्ति । अत्रत्याः अध्यापकाः सुयोग्याः (7) ............ । प्रधानाध्यापकः अपि विनम्रः कर्मठः च । अहम् अत्र प्रवेशं (8) ............ अति प्रसन्नः । ग्रीष्मावकाशे त्वं दिल्लीनगरं (9) .......... । गृहे सर्वेभ्यः मम यथोचितप्रणामाः ।

तव अभिन्नमित्रम् ।

(10) ............

**3 प्रदत्तचित्रस्य वर्णनं मंजूषायां दत्तशब्दानां सहायतया संस्कृते पंचवाक्येषु कुरुत-** 2×5=10



| |
|---|
| आरक्षकाः, वनस्य, अनेके, चत्वारः, आक्रमणम्, दृश्यम्, वृक्षाः, चित्रकः, आत्मानम्, हरीतिमा, रक्षति, भुशुण्डी, हस्ते । |

**मंजूषा**

अथवा

मञ्जूषायां प्रदतशब्दानां सहायतया 'वनानां महत्वम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।

| |
|---|
| पर्यावरणस्य, हरीतिमा, वृष्टिः, वनानि, रक्षणम्, पशूनाम्, निवासस्थानम्, कुर्वन्ति, सर्वत्र, दृश्यते |



https://www.evidyarthi.in/

## खण्ड ग (अनुप्रयुक्त-व्याकरणम्) ३० अंकाः

**4. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत-** 1×6=6

i **रंगमंचे ............... नृत्यन्तु ।**

क) भवान् ख) भवताम्

ग) भवन्तः घ) भवत्सु

ii **भो आचार्य! अत्र ......................... लिखन्ति I**

क) विद्वान् ख) विदुषः

ग) विद्वन् घ) विद्वांसः

iii **.................... किं नाम?**

क) भवान् ख) भवताम्

ग) भवतः घ) भवत्सु

iv **मनुष्यः कदापि ----------- न अवसादयेत्**

क) आत्मान ख) आत्मानानाम्

ग) आत्मनि घ) आत्मानम्

v **विद्या .................. पूजिता भवति**

क) राजनि ख) राजसु

ग) राजानम् घ) राज्ञः

Vi **-------------- सर्वत्र पूज्यते**

क) विद्वान् ख) विदुषः

ग) विद्वन् घ) विद्वांसः

**5. उचितसंख्यावाचकैः शब्दैः रिक्तस्थानानि पूरयत -** ½×12=6

i **आम्रवृक्षे ............................ वानराः तिष्ठन्ति**

क) चत्वारि ख) चतुरः

ग) चत्वारः घ) चतस्रः

ii **................................ वाटिकायाम् जनाः भ्रमन्ति**

क) एकस्याम् ख) एकाम्

ग) एकस्मिन् घ) एकस्याः

iii **तत्र ...................... बालिकायाः पितरौ आगतौ -**



https://www.evidyarthi.in/

क) एकस्य | ख) एकस्याः
ग) एकस्या | घ) एकस्याम्

iv **............ छात्रैः अद्य पुरस्काराः जिताः**

क) त्रयः | ख) तिसृभिः
ग) त्रिभिः | घ) त्रयोभिः

v **कालिदासस्य ..................नाटकानि सन्ति**

क) त्रीणि | ख) तिसृभिः
ग) त्रयः | घ) तिसृभ्यः

vi **नृपस्य दशरथस्य .............. पुत्राः आसन्**

क) चत्वारि | ख) चतस्रः
ग) चत्वारः | घ) चतुरः

vii **जलम् अन्नं सुभाषितं च एतानि .................. रत्नानि सन्ति**

क) त्रीणि | ख) तिस्रः
ग) त्रयः | घ) तिसृभिः

Viii **अस्मिन् वृक्षे ................ खगौ स्तः**

क) द्वे | ख) द्वाभ्याम्
ग) द्वौ | घ) द्वयोः

IX **रंगमंचे ------------ कन्याः नृत्यन्ति**

क) चत्वारि | ख) चतस्रः
ग) चत्वारः | घ) चतुरः

X **कक्षायां------------ छात्राः लिखन्ति**

क) त्रीणि | ख) तिस्रः
ग) त्रयः | घ) तिसृभिः

XI **मम पार्श्वे --------------- रुप्यकाणि सन्ति**

क) पंचः | ख) पंचाः
ग) पंचारः | घ) पंच

XII **मम शरीरे ----------- हस्तौ स्तः**

क) द्वे | ख) द्वाभ्याम्
ग) द्वौ | घ) द्वयोः



https://www.evidyarthi.in/

**6. उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत -** 1x6=6

**I -------- राजतां पावनम् भारतम् ।**

**क)मोदन्ताम् ख ) मोदताम् ग ) मोदस्व घ ) मोदैः**

**II. विदुषाम् सर्वत्र आदरः ................ ।**

क) भवेयुः ख) भवेताम्

ग) भवाम घ) भवेत्

**iii अद्य उपवासः वर्तते। भवान् भोजनं न ......................।**

क) कुर्याताम् ख) कुर्या

ग) कुर्यात् घ) कुर्यात

**Iv- सद्गुणाः सर्वेभ्यः ----------- I**

**क ) रोचन्ताम् ख ) रोचेताम् ग ) रोचताम् घ ) रोचस्व**

**v - सहनाववतु, सह नौ भुनक्तु, सहवीर्यं ...................**

क) करवावहै ख) करोषि

ग) करोमि घ) करिष्यामि

**vi. मानवः सदा ईश्वरं ................**

क) भजेत ख) भजेताम्

ग) भजेत् घ) भजेयुः

**7 अधोलिखितवाक्येषु कोष्ठकगतपदेषु उचित उपपदविभक्तिं प्रयुज्य लिखत-** 1×6=6

क) अयं चिकित्सालयः अस्ति अलं ......................... (कोलाहल)

ख) मातुः ................ विना बहिः मा गच्छ (आज्ञा)

ग) रमेशः .............. प्रति गच्छति (विद्यालय)

घ) माता ............... स्निह्यति (पुत्र)

ङ) रमा.................. श्रेष्ठा (बाला)

च) .................. विना जीवनं नास्ति (जल)

**8क. अधोलिखितवाक्येषु प्रकृति-प्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयत** 1×3 = 3

क) कथमस्माकं दौर्भाग्यं भवताऽपि ............. (परि+ज्ञा+क्त)

ख) देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र ......... (प्र+स्था+क्त)

ग) वीरैः धीरैः बहु ............... देशस्य (उप+ कृ+क्त)

**8ख. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ पृथक्कृत्य लिखत -** 1 × 3 = 3



https://www.evidyarthi.in/

क) सूदः भोजनं (खादितवान्) .......... + ...............

ख) चित्रं (ईक्षमाणा) ............. + ............ बालिका प्रसन्ना भवति

ग) छात्रः क्षेत्रे धावितवान् .......... + ................

**खण्ड घ (पठित-अवबोधनम्) ३५ अंकाः**

**9.अधोदत्तं गद्यांशंए पद्यांशं नाटयांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता स च मुनिः बद्धांजलिः तामवदत् - " कथं त्वया अनन्यगोचरो बलाकावृततान्तः ज्ञातो इति ब्रूहि, ततो भिक्षां गहीष्ये । " साऽवदत् - मुने! भर्तृसेवायाः अपरं कंचन धर्मं न करोम्यहम् । तत्प्रसादेनैव मे एतादृशं विज्ञानम् । किंच इतः धर्मव्याधाख्यं कंचनं मांसविक्रयिणं गत्वा एतत् पृच्छ । ततः ते श्रेयो भविष्यति, त्वं च निरहंकारः भविष्यसि इति । एवं सर्वविदा पतिव्रतया अभिहितः गहीतातिथिसत्कारः सः मुनिः तां प्रणम्य तद्गृहात् निरगच्छत् ।

**क. एकपदेन उत्तरत -** ½ × 2 = 1

i) पतिव्रता किं धर्मं करोति स्म?

ii) साध्वी मुनिं कुत्र गत्वा प्रष्टुम् अकथयत्?

**ख. पूर्णवाक्येन उत्तरत -** 1×2 = 2

i) गृहीतातिथिसत्कारः मुनिः किम् अकरोत् ?

ii) मुनिः बद्धांजलिः किमपृच्छत्?

**ग. दत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत -** ½×4= 2

i) 'पतिव्रतया' इति शब्दस्य विशेषणपदं गद्यांशात् चित्वा लिखत ।

क) अतिशोभनम् ख) गृहीतातिथिसत्कारः

ग) सर्वविदा घ) अतिदुष्करम्

ii) 'नत्वा' इत्यर्थे कः शब्दः अत्र प्रयुक्तः?

क) प्रणम्य ख) समीपं

ग) निरहंकारः घ) दुष्करम्

iii) अनुच्छेदे ते' इति पदं कस्मै प्रयुक्तम् ?

क) पतिव्रतायै ख) मुनये

ग) बलाकायै घ) तत्



https://www.evidyarthi.in/

¡v) 'ग्रहीष्ये' इति क्रियापदस्य कर्तृपदं लिखत ।

क) मुनिः  ख) पठ्

ग) गम्  घ) पतिव्रता

**पंद्यांशः**

नृत्यामि नित्यं धवलास्तरेषुए संकेतितांकैः प्रकटीकरोमि ।
भावं जनानां हृदयेषु गूढंए कृष्णाननाऽऽलोच्य वदन्तु काऽहम् ।।

**क. एकपदेन उत्तरत -** ½ × 2 = 1

¡) लेखनी नित्यं कुत्र नृत्यति?

¡¡) कृष्णानना का अस्ति?

**ख. पूर्णवाक्येन उत्तरत -** 1×2 = 2

¡) लेखनी कैः भावं प्रकटीकरोति?

¡¡) अस्याः प्रहेलिकायाः उत्तरं किम् अस्ति?

**ग. दत्तविकल्पेभ्यः शुद्वम् उत्तरं चित्वा लिखत -** ½×4= 2

¡) ‘भावं' इति शब्दस्य विशेषणपदं पद्यांशात् चित्वा लिखत ।

क) गूढं  ख) गृहीतातिथिसत्कारः

ग) संकेतितं  घ) जनानां

¡¡) विचार्य' इत्यर्थे कः शब्दः अत्र प्रयुक्तः?

क) आलोच्य  ख) कृष्णानना

ग) भावं  घ) दुष्करम्

¡¡¡) मानवानाम् इति पदस्य पर्यायः किम् ?

क) आलोच्य  ख) कृष्णानना

ग) भावं  घ) जनानाम्

¡v) नृत्यामि' इति क्रियापदस्य कर्तृपदं लिखत ।

क) हृदयेषु  ख) लेखनी

ग) अहम्  घ) पतिव्रता

**नाटयांशः**

**लक्ष्मीधरः -** (द्वारपालेन सह प्रविश्य) राजन्! अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु । वर्धन्तां विभवाः सौख्यानि च ।



https://www.evidyarthi.in/

**भोजः** - अनुगृहीतोऽसिम । कुतः समागमनम् अत्रभवताम् ?

**लक्ष्मीधरः** -राजन्! यत्र जलपूर्णं सरः भवतिए तत्र पक्षिणः स्वयं समायान्ति ।अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि । अधुना भवद्राज्ये निवस्तुम् इच्छामि ।

**भोजः** -ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः । (मन्त्रिणं प्रति) मन्त्रिवर! नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु । नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः वासयितव्यः ।

**मन्त्री** - यथा आज्ञापयति देवः ।

**क. एकपदेन उत्तरत -** ½ × 2 = 1

¡) यत्र जलपूर्णं सरः भवतिए तत्र के समायान्ति?

¡¡) लक्ष्मीधरः कस्य राज्ये निवस्तुम् इच्छति?

**ख. पूर्णवाक्येन उत्तरत -** 1×2 = 2

¡) लक्ष्मीधरः किम् समाकर्ण्य धारानगरीम् आगच्छत्?

¡¡) लक्ष्मीधरः कस्य गृहे वासयितव्यः आसीत्?

**ग. दत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत -** ½×4= 2

1) गच्छन्ति' शब्दस्य विलोमपदं नाट्यांशात् चित्वा लिखत ।

क) समायान्ति ख) खेलन्ति

ग) पठन्ति घ) धावन्ति

2) ‘यशः’ इति कस्य शब्दस्य अर्थः?

क) जलस्य ख) कीर्तेः

ग) विदुषः घ) अपयशसः

3) अत्र ‘सरः’ शब्दस्य किं विशेषणं प्रयुक्तम् ?

क) दानशीलतां ख) जलम्

ग) जलपूर्णं घ) कीर्तिः

4) आज्ञापयति' अस्य क्रियापदस्य कर्तृपदं किम् ?

क) मन्त्री ख) पण्डितः

ग) मम घ) देवः

**10क) मंजूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत ।** 1/2×10 =5

धत्ते भरं कुसुमपत्रफलावलीनां घर्मव्यथां वहति शीतभवां रुजं च ।



https://www.evidyarthi.in/

यो सर्वमर्पयति चान्यसुखस्य हेतोः तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥

**अन्वयः -** यः (वृक्षः) कुसुमपत्रफलावलीनां भरं (1) …….. घर्मव्यथां (2) ……….. शीतभवां रुजं च (यः) अन्यसुखस्य हेतोः च(3)-------- अर्पयतिए तस्मै वदान्यगुरवे(4) ------------ नमः (5) ………….. ।

10ख) **छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**

**फलान्यपि परार्थाय वृक्षाः सत्पुरुषाः इव ॥**

**अन्वयः** - अन्यस्य छायाम् (1) …………… स्वयं च(2) ---------- तिष्ठन्ति (3) ……………. सत्पुरुषाः इव (4) ……….. फलानि(5)--------(यच्छन्ति) ।

| **मंजूषा- सर्वम् - तरवे- धत्ते - अस्तु- वहति - परार्थाय - कुर्वन्ति - अपि - वृक्षाः- आतपे** |
|---|

11. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत - 1 × 5 = 5

1 अष्टावक्रः <u>जननीम्</u> अपृच्छत् - मातः क्व आस्ते मम पिता ?

2 राज्ञा <u>हास्यकारणं</u> पृष्टम् ।

3 <u>राजर्षिः जनकः</u> आत्मानम् धन्यं मन्यते ।

4 <u>मात्रा</u> अनुज्ञातः स राजसभां गतः ।

5 अष्टावक्रः <u>मिथ्याज्ञानगर्वितान्</u> दृष्ट्वा हसति ।

12- **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत -** ½ × 10= 5

i जलमन्विष्यता तेन कश्चन आह्लादकरः शब्दः श्रुतः ।

ii पर्वतात् पतन्तः जलबिन्दवः मधुरं संगीतं जनयन्ति ।

iii एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत् ।

iv एतद् अवगत्य पिपासां विस्मृत्य स आश्रमम् आगतवान् ।

v महर्षिपराशरेण वृक्षायुर्वेदः रचितः

vi एवं यत् संगीतसाधनं निर्मितवान् तस्य नाम मृदंग इति ।

vii संगीतसाधनेषु प्रतिध्वनेः उत्पादनार्थं सूक्ष्मक्रमः आवश्यकः भवति ।

viii तम् अनुसृत्य स अग्रे गतः ।

ix एषा कथा भरतनाट्यशास्त्रे वर्णिता ।

x सः प्रतिध्वनिविज्ञानम् अन्विष्टवान् ।



https://www.evidyarthi.in/

13 **शब्दार्थं मेलनम् कुरुत -** ½ × 10 = 5

| क | ख |
|---|---|
| अनारतम् | सुशोभते |
| भूतले | निरन्तरम् |
| भाति | कोऽपि |
| सम्बलम् | हिमालयः |
| अखिलम् | पृथिव्याम् |
| व्रजेत् | परिवारम् |
| व्याधिना | आश्रयः |
| कश्चित् | रोगेण |
| कुटुम्बः | समस्तम् |
| हैमाद्रिः | गच्छेत् |

**.......... इति .......**



evidyarthi
https://www.evidyarthi.in/